Shodhshauryam, International Scientific Refereed Research Journal
© 2023 SHISRRJ | Volume 6 | Issue 2 | ISSN : 2581- 6306

# महाकाव्यजानकीहरणजानकीजीवनमहाकाव्ययोः राजनीतिः, अर्थनीतिः, राजधर्मः, सार्वभौमत्वं विज्ञानम्

डॉ. सीता राम शर्मा
प्रोफेसर (साहित्य) राजकीय धुलेश्वर आचार्य, (पी.जी. संस्कृत महाविद्यालय, मनोहरपुर, जयपुर)

**Article Info**

**Publication Issue :**
March-April-2023
Volume 6, Issue 2

**Page Number :** 87-94

**Article History**
Received : 07 March 2023
Published : 15 April 2023

**शोधसार**:-जानकीहरणजानकीजीवनमहाकाव्ययोः राजनीतिविज्ञानम् इति गवेषणानिबंधे उभयत्रमहाकाव्यद्वयगतायाः राजनैतिकावस्थायाः स्वातन्त्रेण व्यष्टिरूपेण तुलनात्मकविचारेण च सम्पादिता अस्माभिः । अत्र दण्डनीतेस्तथ अखिलराजधर्ममूलत्वेन अर्थनीतेरपि परिचयः आलोच्यमहाकाव्यद्वयगतोपादानानि संकलय्य उपपादयितुं प्रयत्नः कृतः। पर्यालोचनस्य समग्रस्य स्पष्टीकरणार्थं याथातथ्येन च समुपस्थापनार्थं प्राचीनराजनीतिशास्त्राणि अनुगमकतयानुसृतानि पर्यवेक्षतानि च। सम्भवतः ख्रीष्टिय- षष्ठशतके आविर्भूतस्य कविकुमारदासस्य जानकीहरणमहाकाव्ये तथा अर्वाचीने पण्डितप्रवराभिराजराजेन्द्रमिश्रस्य जानकीजीवन-महाकाव्ये च प्राक्तनकविनाट्यकाराणां कालिदास - भट्टी भाषादीनां काव्यनाट्येषु राजनैतिकवैशिष्ठानां प्रभावे अपि निवेदितो अस्माभिः। प्राचीननवीनयोः महाकाव्ययोः चित्रितस्य राजनैतिकधर्मस्य मानदण्डः आधुनके अपि राष्ट्रशासने अनुसरणयोग्यतामार्हतीत्यवधेयम् ।

**कूटशब्दाः**- राजनीति, अर्थनीतिः राजधर्म, सार्वभौमत्वं राष्ट्रतत्वम्, सामन्ततन्त्र, मन्त्रीपरिषदः, दूतः, सभा, सभासदः, करनिर्धारणनीतिः, राष्ट्रशासनकर्तृत्व- मुत्तराधिकारसूत्रेण प्रजाकर्तृक निर्वाचनमुखेन वा राज्याभिषेकः दिग्विजययात्रा, विचरव्यवस्थ, युद्धं विश्वशान्तिश्च, शिक्षानतः, आजीविका, षाड्गुण्यमपायचतुष्टय, राजमण्डलं, कल्यानमूलकराष्ट्रशासनं राजनैतिकमैत्री आपत्प्रतिकारोपायचिन्तनम्।

शोधः (मुख्यांशः) अस्मदनुसन्धेयमहाकाव्यद्वयस्थं राजनीतिविषयोपस्थापनम् अभिप्रेतम् । राजनीतिसम्बन्धिनो विषया वैदिकसंहिता सुब्राह्मणेषु राजधर्म - विषयकशास्त्रेषु च सादरं समुपवर्णिता उपलभ्यन्ते । तेषां सर्वतः समाकलनेन एकत्रनिबन्धनम् अस्माकमिष्टम् । परन्तु आकारगतपरिमाणतया विषयगत वैचित्र्यबाहुल्यात् च सांप्रतं सातिशयसंक्षेपेण राष्ट्रविषयकं तत्त्वं किञ्चिन्मात्रमेव समुद्धृत्य उदाहरणरूपेण उपस्थापयामः । वैदिककाले तदुत्तरकाले च राजतन्त्रं राष्ट्रनीतौ सर्वोपरि स्वमहिम्ना विराजते स्म । अतः राष्ट्र राज्ये वा राज्याभिषिक्तः राजा वा श्रद्धया च गृहीतः आसीत्। ततस्तु राज्यस्तुतिः राजस्तुतिर्वा साकूतमुल्लिखितं वेदेषु । उत्तरकाले काव्यजगति नाट्यजगति च लौकिक-संस्कृतवाङ्मये राजतन्त्रस्यैव विजयगीतिडिण्डिमः श्रूयते । विशेषतस्तु 'गद्यपद्य-मयी राजस्तुतिः काव्यस्य विशिष्टरूपमाधाय विरूदसंज्ञया प्रथिता दृश्यते । '

ऋग्वेदसंहितायां दशममण्डले 173 - संख्यके सूक्ते च मन्त्रषट्के राजस्तुति- विधीयते।" अविचलितस्वतन्त्रप्रभुसत्तायां प्रतिष्ठितः प्रजाहितैषी राजा प्रजानाम् अभिमततमरूपेण वर्णितः उपलभ्यते । अथर्ववेदसंहितायामपि राज्याभिवर्धनं राजकर्तृकं शत्रुघातनं शत्रुसम्मोहनं च सम्यक् वर्णित मास्ते । स्वराज्यच्युतस्य राज्ञः पुनःस्थापनं, प्रजाकर्तृकं राज्ञः वरणं राज्ञः राज्यलाभः तस्य च राजकृत्या - नुष्ठानम् इत्येते विषयाः ऋग्वेदीयमन्त्रषट्के उपनिबद्धा वर्तन्ते । अपि च अथर्ववेदे एकस्मिन् सूक्ते राजसूययागेन राज्याभिषेकवर्णनं तथा सेनानिरीक्षणं, सेनासयोजनं,

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

संग्रामविजयादिवर्णनमपि सहृदयानां प्रीतिजननाय समुपन्यस्तं उपलभ्यते । ऐतरेय ब्राह्मणे 33 – 39 – संख्यकेषु अध्यायेषु राजसूययागे राज्ञः राज्याभिषेकवर्णनं तस्य प्रजापालनं राज्यसंरक्षणं प्रजाकल्याणाय राज्यस्य समृद्धिसाधनं तत्र तत्र वर्णितं विद्यते । राज्यस्य कल्याणाय ब्राह्मणपुरोहितस्य संस्थापनम् अपि चत्वारिंशेऽध्याये समुपन्यस्तं दृश्यते । 38 – तमे अध्याये द्वितीयेखण्डे राज्यात् प्रभृति साम्राज्यं यावत् भूखण्डानां परिणतिवैचित्र्यात् अधिकारवैचित्र्यात् उच्चावचपदभाजां विविधत्वं नामतः उल्लिख्य प्रदर्शितम् । अतः राजानोऽपि उत्कृष्टापकृष्टपदाधिकारितया भोज – स्वराट् – विराट् – परमेष्टि–राजेत्यादिभिः संज्ञाभिः संज्ञिता भवन्ति ।

एवमेव अखिलवैदिकसंहितासम्बद्धेषु ब्राह्मणेषु राजतन्त्रसंश्लिष्टाः केचन यागाः प्रसिद्धाः सन्ति । ते हि विशिष्टयागाः राजसूय– वाजपेय–अश्वमेध–विश्वजिदित्यादि–नाम्ना प्रसिद्धिम् आप्नुवन्ति । एतेषां यागानामनुष्ठानेन क्रमेण 'राजसूयेन राजा' भवति, वाजपेयेन सम्राट् भवति, अश्वमेधेन सार्वभौमः भवति, विश्वजिता च विश्वाधिपतिर्भवति। एतेषामनुष्ठानेन तारतम्येन राष्ट्राधिकारलाभादपि तेषु अनुष्ठानेषु एव अभिषिक्तानां अधिपानां स्वराज्यं प्रति स्वप्रजापुञ्जं प्रति च संरक्षणाभ्युदयादिकर्तव्य– पालनशपथस्यापि ग्रहणम् अवश्यं कर्तव्यमिति विहितं दृश्यते । राजनीतिविधायकमालोचनं मनुप्रभृतिविरचितेषु विंशतिसंख्यापरिमितेषु स्मृतिशास्त्रेषु अपि समुपलभ्यते । विशेषतः मनुसंहितायाः सप्तमाध्याये तथा याज्ञवल्क्यस्मृतौ आचाराध्याये राजधर्मप्रकरणे सविस्तारं वर्णितमस्ति । प्रख्यातेषु राजनीतिशास्त्रेषु वृहस्पति–शुक्राचार्य–कामन्दक– कौटिल्य–प्रमुखविरचितेषु वैशद्येन प्राक्तनाचार्यमतोपन्यासपूर्वकं सुनिबद्धं राष्ट्रतत्त्वं समुपलभ्यते ।

महापुराणेषु उपपुराणेषु च राजनीतिशास्त्रमधिकृत्य विमर्शः सविशदम् अस्माभिः उपलभ्यते । तेषां संग्रहेण आलोचनमपि बृहदायतनं स्यात् । महाभारते आर्षमहाकाव्ये विशेषतः शान्तिपर्वणि राजनीतेः अर्थनीतेश्च द्वयोरेव सुविस्तृतमालोचनम् अस्माकं दृष्टिपथं अवतरति । रामायणे अपि तथैव। अतः जानकीहरणमहाकाव्ये जानकी– जीवनमहाकाव्ये च राजधर्मविवरणस्य उपस्थितिः अवश्यमेव सम्भावनापक्षं न परिहरति। कोशलाधिपतेः दशरथस्य पुत्रः रामचन्द्रः राज्याभिषेकव्याघातात् प्रत्यवायवशात् निर्वासितोऽभूत्। तदनन्तरं रावणवधादिकर्म परिसमाप्य अयोध्यां प्रत्यागत्य राज्ये राजरूपेण अभिषिक्तः बभूव । तत्र च बालिवधेन किष्किन्धाराज्ये सुग्रीवस्य अभिषेचन, तथा च रावणवघात् अनन्तरं विभीषणस्य राज्याभिषेकः तत्र तत्र प्रदर्शितः । यथा कोशलदेशाधिपतिः आदौ पिता दशरथ पश्चाच्च पुत्र रामचन्द्रः एवं मिथिलाधिपति जानकीजनकः राजर्षिजनकश्च महाकाव्यद्वये सार्वभौमनरपतिरूपेण यथाशास्त्रमभिषिच्य स्थापितः । वशिष्ठेन शतानन्देन च ऋषिणा पृथक् पृथक् सर्वेषां दशरथ–रामचन्द्र– राजर्षिजनक – बालि–सुग्रीव – रावण – विभीषणेति राज्याधिपानां सामान्यविशेषतश्च राज्याभिषेकपूर्वकं राज्याधिकारं प्राप्य राजधर्मपालनप्रक्रिया समासता व्यसतो वा समुल्लिखिता प्राप्यते । एतेषां राज्ञां राजनैतिकव्यवहारा आलोच्यमहाकाव्यद्वयतः समुदाहृत्य समीक्षणम् इष्टम् । विंशतिसर्गात्मके जानकीहरणमहाकाव्ये प्रायेण सर्वत्र, एवं एकविंशतिसर्गात्मके जानकीजीवने च तत्र तत्र प्रासंगिकतया वर्णिता उपात्ता च राजनीतिः कदाचित् ऋजुणा मार्गेण क्वचित् च कुटिलगत्या घटनाचक्रान्तर्वर्तितया प्रवहति स्म इति उपलब्धुं शक्नुमः वयम् । अस्मिन्न् क्षणे ग्रन्थ–गौरवभिया सविस्तरं सोदाहरणं च तत् राष्ट्रतत्त्वस्वरूपं वर्णयितुं प्रेरणाविमुखा वयमिति सर्वं सहृदयविदुषां करुणार्द्रचित्तानां स्नेहदृष्टिं अस्मान् प्रति अपेक्षामहे ।

वाल्मीकीयरामायणं कुमारदासीयजानकीहरणम् अभिराजराजेन्द्रमिश्रप्रणीत– जानकीजीवनं च त्रिवेणी संगमरूपं महातीर्थस्थानमिति प्रतिभाति अस्माकं चित्तदर्पणे । वाल्मीकीयरामायणतः प्रेरणाप्रस्रवणधारा कविवरस्य कुमारदासस्य अभिराजराजेन्द्र मिश्रस्य च हृदयबुद्धिकन्दरमवगाह्य शाखाद्वयेन विभज्य कालव्यवधानेन जानकीहरणं जानकीजीवनञ्चेति नाम्ना प्रख्यातेन महाकाव्यद्वायरूपेण विवर्तितं विपरिणतं च परिलक्ष्यते। महाकाव्यद्वये चेतनास्रोतसा बहुनि सामाजिको– पादानानि तरंगभंगलीलया लिलायितानि समुपलभ्यन्ते । तेषु उपादानबहुलेषु राष्ट्रतत्त्वचिन्तनं पर्यवेक्षणविषयतया साम्प्रतम् अस्माकम् ईप्सिततमम् । राष्ट्रतत्त्वे राजनीतिविषयः राजधर्मो वा प्रधानतया प्रतिपाद्यः उपलभ्यते। आलोच्यमहाकाव्यद्वयेविदेह – कौशल – लङ्काराज्यभूमिश्चेति राज्यत्रयं मुख्यतया राजनीतितत्त्वसमीक्षणे समुपस्थितं भवति । गौणतया च मुख्यवृत्तान्तसम्बद्धतया किष्किन्धाऋष्यमूकप्रसङ्गोऽपि उपेक्षितुं न शक्यते । राष्ट्रतत्त्वे भूमण्डलगतस्य विशिष्ट भूखण्डस्य जनसमाजस्य प्रभूत्वस्य च सम्बन्धः संयुक्तः समुपलभ्यते । राष्ट्रशासनतन्त्रस्य सार्वभौमस्वातन्त्र्यम् अर्थात् एकातपत्रप्रभूत्वम् ईप्सितमेव । कदाचित् कुत्रचित् च एतद् तथा न भवति । सामन्तनृपादीनां सार्वभौमराजादधीनत्वात् तेषां सार्वभौमस्वातन्त्र्यं न भवितुम् अर्हति । वाल्मीकीयरामायणे आलोच्यमहाकाव्यद्वयेऽपि समाजतन्त्रस्य

गणतान्त्रिकस्य प्रजातन्त्रस्य वा प्रवर्तनं प्रचलनं वा दृष्टिपथं नावतरति । राष्ट्रपरिपालकरूपेण शासनव्यवस्थायाः प्रवर्तकरूपेण उत्तराधिकारबलेन अथवा प्रजागणद्वारा निर्वाचमुखेन यो भवति राज्यशासकः स एव राजा इति अभिधीयते राजनीतिशास्त्रेषु । अत्र राज्ञः राज्यप्रशासनं निर्धारितनीतिवलेनैव प्रचलति स्म । स एव राजधर्मः इति पारिभाषिकशब्देन परिचीयते ।

जानकीहरणमहाकाव्ये जानकीजीवनमहाकाव्ये च राष्ट्रतत्त्वसमीक्षणं कार्यम- स्माकम् । कालक्रमानुरोधेन पूर्वभावित्वात् जानकीहरणस्य राजनीतितत्त्वपर्यवेक्षणम् आदौ निष्पाद्यम्। रघूणाम् अन्वये वर्तमानस्य अजनन्दनदशरथस्य' समृद्धायाम् अयोध्यानगर्यां प्रजाशासनचरितचित्रणं रम्यं बुद्धिवेद्यञ्चेति वर्णितं कविना । कौशलराज्यस्य राजधानी अयोध्यानगरी । तत्राभिषिक्तः राजा दशरथः । स हि शास्त्रानुगामी इन्द्रियजयी प्रजाहितव्रती विजीगिषुश्चेति । स हि नीत्यनुसारतः निर्धारितेभ्य आयस्थानेभ्यः करादानेन जातिवर्णनिर्विशेषं प्रजानां दुःखहर्ता गुरुवशिष्ठेन सह तथा अष्टसंख्यकोपेतमन्त्रिमण्डलीतोऽपि मन्त्रणापूर्वकं राज्यशासनकार्यनिर्वाहकर्ता परराज्य- विजयेन प्रभूतधनरत्नसंग्रहकारी स्वप्रजानां हितकारीति प्रतीयते ।' मृगयाव्यसन्यप्यसौ राजा दशरथः दिग्विजययात्राया' समधिकः समुत्सुकः आसीत्। तत एव कोशलराष्ट्रस्य प्राच्यां दक्षिणस्यां च दिशि नृपतेस्तस्य दिग्विजययात्रा प्रारब्धा । चतुर्दिगन्तेषु तस्य विजयघोषः समजनि। विजितनृपतिभ्यः अपरिमेयसम्पदमाहृत्य राज्ञः दशरथस्य अयोध्यायां प्रत्यावर्तनं राजमहिम्नः प्रद्योतकम् । एतेन पराराज्याधिकारेण राज्यसीमाविवर्धनं धनरत्नादिवैभवसंग्रहणं च राजचक्रवर्तिहेतुकम् इति । राजनीतिशास्त्रे विजिगीषु नृपतेः तथा सामान्यतः द्वादशात्मकराजमण्डलस्य विषयः उपपादितो दृश्यते । यागाद्यनुष्ठानं राजकर्तव्यं भवति प्रजाहिताय । राज्यशासननैपुण्ये अस्त्रविद्यया सह शास्त्रविद्यायाः अपि अभ्यासः कर्तव्यः । अतः चतुर्थसर्गे रामं प्रति राजकर्तव्यतोपदेशकुशल- राजनीतिज्ञानस्य परिचायकः । राज्ञः दशरथस्य चतुर्थसर्गे युद्धविषयमाश्रित्य औचित्यानोचित्यविचारः उत्थापितः । तत्रविश्वशान्तिप्रयोजनहेतुकं युद्धमपि अनिवार्य भवति क्वचित् कदाचित् चेति सिद्धान्तः उपलभ्यते । पञ्चमसर्गे राक्षसैः सह रामस्य युद्धं वर्णितम् । तत्र राजनीतिशास्त्रोक्तं युद्धकौशलं प्रतिविम्बितं दृश्यते । अपि च धनुर्धारिण श्रीरामचन्द्रस्य धनुर्विद्यायाः युद्धक्षेत्रे शत्रुवधे प्रयोगकौशलमपि प्रदर्शितमास्ते । अत्र वैशम्पायनविरचिते नीतिशास्त्रे नीतिप्रकाशिकायां द्वितीयाध्याये धनुर्वेदविद्याविषयकं तत्त्वविवरणम् अवधेयम्।' जानकीहरणस्य षष्ठसर्गे नीतिशास्त्रसम्मत करादानव्यवस्थायाः ' संकेतः उपलभ्यते । तत्रैव वृद्धावस्थायां राजभृत्यानां भरणपोषणकर्तव्यतोपेशः समुपलभ्यते । दरिद्रान् प्रति औदार्यं भरणपोषणव्यवस्थाकरणमपिराज्ञः कर्तव्यम् इत्यप्यनुशासनमुपलभ्यते । शत्रूणामपि स्त्रियः प्रति रक्षाभारवहनं राज्ञः कर्तव्यपक्षे औचित्येन वर्तते इत्यपि समुल्लिखितम् । नवमसर्गे क्षत्रियनृपतीनां धनुर्विद्याभ्यासपरिचयः उपलभ्यते । दशमसर्गे राज्ञः दशरथस्य राज्यशासननीतिः वर्णिता । तत्र विजयाभिलाषः राजनीतेरङ्गमिति प्रतीयते । शत्रुमित्रोदासीनसम्बद्धराजमण्डलस्य उल्लेखः दशमे सर्गे एव सम्प्राप्यते । साम-दान-भेद-दण्डचतुष्टयस्य सुविहितप्रयोगः राजनीतेरङ्गम् । एतत्प्रसङ्गेनषाड्- गुण्यनीतिरपि उपयुज्यते । आदर्शराजनीतिविषयकमन्त्रणा - पूर्वकराजनीतेः प्रयोगः साफल्यप्रदायको भवति ।

चतुर्थसर्गे श्रीरामचन्द्रस्य ताडकादिराक्षसवधकार्यं नीतिमूलकं क्षात्रशौर्यविज्ञापकं सर्वजनहितकरञ्चेति प्रतीयते । पितुः सकाशात् विश्वामित्रसान्निध्यतश्च अस्त्रशस्त्रादि- विषयकं राज्यशासनविषयकञ्च अनुशासनं तेनाधिगतम् ।

उत्तरकाले सुग्रीवादिभिः सह मैत्रीबन्धनं किष्किन्धाधिपतेः वानरराजस्य बालिनः हननं श्रीरामचन्द्रस्य राजनीतिज्ञानस्य परिचायकम् । चतुर्दशसर्गे नीतिज्ञवानरप्रधानैः सह सीतान्वेषणविषयकम् आलोचनं रामचन्द्रस्य राजनैतिकप्रज्ञासूचकमेव । पञ्चदशसर्गे लङ्काप्रवेशनिमित्तं साम-दान- भेद - दण्डरूपात्मकस्य उपायचतुष्टयस्य प्रयोगनीति : राजनीतिरेव अङ्गभूता। ततश्च लङ्काधिपतिना रावणेन सह युद्धप्रसङ्गे आदौ दूतसंप्रेषणं पश्चाच्च युद्धोद्यमः । युद्धविजयश्च अभिज्ञराजनीतितत्त्वज्ञस्य युद्धविशारदस्य च नीतिनैपुण्यपरिचायकः इति प्रतिभाति । पञ्चदशसर्गे एव दूतरूपेण प्रेषितस्य अङ्गदस्य रावणराजसभायां राजनैतिक भाषणं रावणमातामहस्य नीतिज्ञमाल्यवतः सामद्युपाय- चतुष्टयमूलकं षाडगुण्यप्रयोगमूलकं भाषणं च अभिज्ञराजनीतिविज्ञानस्य परिचायकम् एवेति प्रतीयते। सप्तदशसर्गे औचित्येन राजनीतौ प्रवर्तमानस्य रामस्य परिचयः उपलभ्यते। प्रसङ्गेन अनेन रामस्य उन्नतराज्यप्रशासनपरिचयस्य उपलब्धिरपि पञ्चदशसर्गे वर्णिता अस्ति ।

लङ्काधिपतिरावणस्य सभाभवने सभासदाम् उपस्थितिः आलोचनं तथा रणनीतिकौशलमपि सर्वमेव राजनीतिविषयकमेवेति । अष्टादशसर्गे लङ्काकायुद्धं वर्णितम् । तत्रैव अखण्डवीरता राजनैतिकव्यवहारकुशलता च वर्णिता अस्ति । तत्रैव च सर्गे आपदां प्रतीकारस्य च प्रसङ्गः

उत्थापित: । एकोनविंशसर्गे रावणबधानन्तरं रामकर्तृक- सुग्रीवस्य राज्याभिषेक: वर्णित: । तदनन्तरं विंशतितमे सर्गे श्रीरामचन्द्रस्य अयोध्या-प्रत्यावर्तनं तस्य राज्याभिषेकश्चेति महाकाव्यस्य समाप्ति समुद्घोषयति । एवं विंशतिसर्गात्मकस्य जानकीहरणमहाकाव्यस्य संक्षेपत: राजनैतिकशास्त्रानुसारत: राजनैतिकतत्त्वसमीक्षणे अस्माकं प्रयत्न: प्रद्रशित: । '

जानकीजीवनम् –

एकविंशतिसर्गात्मकं जानकीजीवनं नाम महाकाव्यं विरचितं कविना अभिराज - राजेन्द्रमिश्रेण। महाकाव्येऽस्मिन् राजनैतिकोपादानानुसन्धानमस्माकमभिप्रेतम्। राज्यशासन- तन्त्रविषयकमालोचनमत्र मुख्योद्देश्यतया वर्तते । राज्यभूमि: प्रजासमूह: राज्यप्रशासनकर्ता च परस्परं सम्बन्धविशेषेण सम्बद्धा भवन्ति । नियन्तु: शासकस्य अभावात् कस्मिन्नपि भू-खण्डे वसतां जनानां भोग: न सम्भवति । परस्परसंघर्षेण बलवता दुर्वलस्य समुत्पीडनं भवत्येव। अत: समुत्पीडिता: जना: वास्तुच्युता: सन्त: सपशुद्रव्यसञ्चयमपि बलवत् पीडकहस्ते निक्षिप्य कदाचित् प्राणानोऽपि परित्यज्यन्ति कदाचिच्च जीवन्तोऽपि इतस्तत: भयात् परिभ्रमन्त: क्लेशसन्ततिमनुभवन्ति । अत: हेतो: विशिष्टभू- खण्डवर्तिनां सर्वेषां जनानां रक्षणविधानाय कस्यचित् अस्य भू-खण्डस्य प्रजाजनस्य च नेतृरूपेण पालक: आवश्यको भवति । अत: प्रजानां कल्यानहेतो: निर्दिष्टभू-खण्डस्य भूपालस्य च सुतरामेव आवश्यकतास्ति । अत्रैव राज्यशासकस्य राज्ञ: समुत्पत्ति: उपलभ्यते । राजा च राष्ट्रपालक: दण्डसहायेन शिष्टप्रतिपालनं दुष्टदमनं च विदधाति ।

जानकीजीवनमहाकाव्ये प्रथमसर्गे विदेहराज्यस्य राजधानी मिथिलेति नाम्ना प्रख्याता आविर्भवति । तत्रविदेहाधिपति: निमिनन्दन: सीरध्वज:' ( राजर्षिजनक : ) समागतां दैवीम् आपदं प्रतिकर्तुम् उद्वेगाकुल: समुपलभ्यते । दु:खसहस्राणां भुञ्जानानां प्रजानां जीवनयन्त्रणाम् असहमान: शोकदीर्णहृदय: राजर्षिजनक: प्रधानामात्येन सह मन्त्रणापूर्वकं गौतमपुत्रस्य गुरुशतानन्दस्य तपोवनं गत:। गुरो: शतानन्दस्य उपदेशेन आपत्प्रतीकाराय यज्ञमियेष विदेहराज: सीरध्वज: । यज्ञप्रसङ्गेन हलकर्षणमुखेन सीताया: उपलम्भ: । अत: विदेहराज्यं तस्य राजधानी मिथिला मिथलाराज्यस्य प्रजाजना : विदेहराज: राजर्षिजनक: प्रधानामात्य: राजपुरोहित: गौतमपुत्र: गुरुशतानन्द: इत्येति विषया: परस्परं राजनैतिकेन सम्पर्केण राज्यशासनसूत्रेण च प्रजारक्षणविधानसम्बन्धेन च समुपस्थापिता । चतुर्थसर्गे कोशलराज्यस्य राजधानी अयोध्येति विश्रुता लोके इति समुपवर्णिता । तत्र कोशलराज: अजन्दनदशरथ: तस्य प्रधानामात्य: सुमन्त्रश्च निरन्तरं राज्यस्य प्रजानां च मङ्गलार्थिनौ । एताभ्यां सह गुरुमहर्षिवशिष्ठ: अपि राज्यमङ्गलव्रत नित्यदीक्षितो दृश्यते। अत्र राजामात्यपुरोहितरूपसम्बन्ध - विशिष्टाराजनैतिकसम्बन्धस्य बलवती चित्ररेखा अस्माकं दर्शनमथमवतरति । सप्तमसर्गे मिथिलायां स्वयम्बरमहोत्सवे रामकर्तृकहरधनुभङ्ग: क्षत्रियराजपुत्रस्य धनुर्विद्यापाटवं सूचयति । पुनरपिनवमसर्गे अयोध्यापुर्या: वैभवातिशयपरिचय: वर्णितो दृश्यते । दशमसर्गे राज्ञ: दशरथस्य रामचन्द्रमधिकृत्य राज्याभिषेकचिन्ता समुदिता ।' दशमे च सर्गे राज्याभिषेके अन्तराय: समुद्गत:। फलत: ससीतालक्ष्मणरामचन्द्रस्य वनवासयात्रा परिलक्ष्यते । एकादशे च सर्गे जानकीहरणं, द्वादशे च अशोकवने सीताया: अवस्थानम् । त्रयोदशे सर्गे सीतानुसन्धाने रामस्य ऋष्यमूकपर्वते गमनं, सुग्रीवेण सह मैत्रीस्थापनं तत: वालिबध: तत: सीतान्वेषणे सुग्रीवकर्तृकवानरसैन्यसम्प्रेषणम्, हनुमता च अशोकवाटिकायां सीतादर्शनम् इत्येवं वृत्तान्तजातं समुपलभ्यते । चतुर्दशसर्गे वानरसैन्यै: सह रामस्य लङ्काप्रवेश: ततश्च लङ्कायुद्धं रावणविनाशश्च संभृत्य: । ततश्च पञ्चदशसर्गे रावणबधादन्तरं आर्यधर्मस्य पुन: प्रतिष्ठा, विभीषणस्य च राज्याभिषेकश्च सम्पादित: श्रीरामचन्द्रेण । राज्याभिषेकसमकालञ्च विभीषण: श्रीरामचन्द्रस्य सचिवरूपेण नियुक्त: अभूत् इत्यपि वार्ता एकविंशतितमे सर्गे उपलभ्यते । पञ्चदशसर्गे एव सीताया: अग्निपरीक्षा दृश्यते । षोडशसर्गे धर्मानुसारत: विभीषणं प्रति लङ्काशासनस्य उपदेश: श्रीरामचन्द्रेण । तत: श्रीरामचन्द्रस्य सीतया लक्ष्मणेन च सह अयोध्यायां प्रत्यावर्तनम् । ततश्च राज्याभिषेक: रामस्य अत्रैव सर्गे वर्णित: दृश्यते । राजनैतिकदृष्ट्या प्रथमसर्गे चतुर्थसर्गे नवमसर्गे अष्टादशसर्गे एकोनविंशतितमे सर्गे च कोशलाधिपते: दशरथस्य शासनतन्त्रस्य शिष्टपरिचय: उपलभ्यते। राज्ञ: दशथस्य आसन् अष्टसङ्ख्यका मन्त्रिण: मन्त्रणाकार्येषु सातिशयं निपुणा: । पुरोहितानां मध्ये महर्षिगुरुवशिष्ठ: आसीत् प्रधानतम: । सुमन्त्र: आसीत् राज्ञ: दशरथस्य प्रधानमन्त्री, सर्वविधराजकार्येषु नितरां निष्णात: । प्रजापालनं राज्यस्य अन्तर्वहि सुरक्षाव्यवस्थासम्पादनं च उक्तानाम् अमात्यानां गुरुवशिष्ठप्रमुखानां च मन्त्रानुसारत: सुसिद्धं भवतिस्म । दैवी मानुषी च आपत्प्रतीकार: अमात्यानां ऋत्विजानां च साहाय्येन अपाकृतं समुपलभ्यते । अत: नृपते: दशरथस्य आदर्शराज्यशासनपद्धति:' प्रजानां हिताय सुखाय च निरन्तरं जागरूका

आसीत् इति प्रतीयते। विदेहराजस्य सीरध्वजस्य राज्यमपि प्रजानां शान्तिसुखसम्पत्तये एव कल्पते स्म । सर्वापदां प्रतीकारे प्रधानामात्यस्य अन्येषां च धी- सचिवानां कर्मसचीवानां तथा प्रधानपुरोहितस्य गौतमपुत्रस्य गुरुशतानन्दस्य साहाय्यं सातिशयं हितकरम् अभवत् इत्युपलभ्यते । राजर्षिजनकस्य रामसीतयो: विवाहबन्धनेन राज्ञा दशरथेन सह सम्बन्धस्थापनं राजनैतिकप्रज्ञाया: एव परिचयं सूचयति । प्रजानाम् आपत्प्रतीकारे समुत्कण्ठा उपयुक्तोद्यमश्च लोकतन्त्रस्य प्रतिनिधिरूपेण विदेहाधिपते: न केवलं प्रशासनपटुत्वम् अपि तु प्रजाकल्याणव्रतित्वमपि विज्ञापयति । अत: राजर्षिजनकस्य राजचरित्रमहिमा समुज्ज्वलेति प्रतिभाति । श्रीरामचन्द्रस्यापि राज्यशासनकौशल: प्रकर्षस्य चरमकोटिमधिरोहति। तस्य सुशासनफलं प्रजानां शान्तिसुखदायकमित्येवं चित्रं कविना आलिखितं प्रतीयते जानकीजीवनमहाकाव्यस्य विंशतितमे सर्गे । तत्रैव सर्गे अश्वमेध - यज्ञानुष्ठानप्रसङ्गात् श्रीरामस्य विजिगीषा स्पष्टत: प्रतिभाति । अनुष्ठानेन अनेनय ज्ञफलरूपेण यज्ञफलभोक्ता यजमान: श्रीरामचन्द्र: कुलाधिराजपदे राजचक्रवर्तिपदे वा अभिषिक्तोऽभूत्। अश्वमेधयागे आमन्त्रिता: अभूत् भारतवर्षस्य अन्तर्वर्तिनस्तथा वहिर्वर्तिनश्च राजान: । अयमपि शिष्टाचार: राजनैतिकप्रज्ञापरिचायक : प्रतिभाति । अश्वमेधयागद्वारेण स्वाधीननृपतीणामपि अधीनतापाशेन सामन्तिकीकरणं तेभ्यश्च धनरत्नादिबहुमूल्यद्रव्याणाम् आहरणं राज्ञ: श्रीरामचन्द्रस्य स्वराजपदमर्यादावि - बृद्धिकरं कोशसञ्चयोन्नयनसम्पादकं च भवत: तथैव प्रजानां हिताय आहतानां धनानां विनियोग: प्राचीनभारतीयार्यराजनैतिकसंस्कृते: महिमानमेव द्योतयति । एकविंशतितमे सर्गे पुनरपि अयोध्यावर्णनप्रसङ्गेन कोशलराज्यस्य सुशासनस्य तत्फलतस्य प्रजानां सुसमृद्धे: वर्णनं समुपलभ्यते। तत्रैव कोशलाधिपते: दशरथस्य रामचन्द्रस्य वा अष्टसङ्ख्यकानाम् अमात्यानां वर्णनं समुपलभ्यते । अत्रैव च सर्गे ऋत्विजानामपि अष्टसङ्ख्यकानां समुल्लेख: दृश्यते। अयमपि रामराज्यकालीनराजनैतिकव्यवस्थापरिचायक एव । अष्टादशसर्गे सीताविषयकजनापवादप्रसङ्गेन लोकतन्त्राधिपते: प्रजानुरञ्जकस्य श्रीरामचन्द्रस्य जनमतं प्रति सम्मानपुरस्कृतम् आस्थाप्रदर्शनं गणतान्त्रिकमूल्यवोधस्य परिचायकमिति प्रतीयते । रामराज्यस्य महिमा लोकतन्त्ररूपेण कियान् आसीत् तस्योपलब्धि एक विंशतितमसर्गस्य अन्तभागे गुरुवशिष्ठेन अभिभाषिता ।

धीवरराजगुहेन सह मैत्री सुग्रीवेण सह च मैत्री राक्षसवधेन ऋषीणां तपोवनानां वनवासिनां च सर्वेषाम् रक्षाविधानं श्रीरामचन्द्रस्य महनीयकीर्ते: उज्ज्वलतमम् उदाहरणम् अत्र राजकर्तव्ये क्षात्रतेजस: प्रदर्शनं दुर्लभमिति राजनैतिक क्षेत्रेऽपि सुतरामेव अभिमतम्। रावणवधेन सीतोद्धारेण च राजधर्मस्य न्यायनीतिनिष्ठस्य आर्यधर्मस्य च श्लाघनीयपदम् उत्तुंगम् आरोहति। युद्धप्रसङ्गे नचतुरङ्गसेनापति: च अवश्यमेव अपेक्षते । तत्र साम-दान-भेद - दण्डप्रमुखोपायचतुष्टयस्य' षाडगुण्यस्य च प्रयोग: युद्धविजये अपरिहार्य: । चतुरङ्गसेनाया: युद्धक्षेत्रे व्यूहरचनाऽपि अपेक्षितैव।' पुरुषार्थचतुष्टयसाधनं तु राज्यशासनस्य मूलमन्त्र: । अवसानत: प्रजासुखे राजसुखं प्रजाहिते राजहितम् इत्येव रीति: श्रीरामराज्ये विराजित: उपलभ्यते । जनमतम् समादृतं न कदापि उपेक्षितम् इत्यपि परिलक्ष्यते जानकीजीवनमहाकाव्येऽस्मिन् । अत्र कविवर्यस्य अभिराजराजेन्द्रमिश्रस्य राजनीतिविषये विशेषाभिधित्सा सुस्पष्टं प्रतिभाति । जानकीहरणजानकीजीवनमहाकाव्ययो: तुलनात्मकसमीक्षणम्-

जानकीहरणजानकीजीवनमहाकाव्ययो: नामकरणभेदेऽपि मूलाख्यानं यत् वाल्मीकीयरामायणान्तर्गतं तदेव कवियुगलस्य स्वाभिप्रायानुसारत: प्रसृतम् उपलभ्यते । मूलरामायणस्य काण्डषट्कमाश्रित्य महाकाव्यद्वयं विरचितम् । महाकाव्यद्वये अयोध्यायां राज्ञ: दशरथस्य तदनन्तरं श्रीरामचन्द्रस्य राज्यशासनचित्रं तथा मिथिलायां मिथिलाधिपते: जानकीजनकस्य राज्ञ: सीरध्वजस्य राज्यशासनं प्रजानाम् अनुरञ्जने कल्याणसाधनेन च प्रवर्तमानम् दृश्यते। लङ्काधिपते: रावणस्यापि स्वराज्यशासनं राक्षसहिताय वै परिकल्पितं समुपलभ्यते। यथा अयोध्यायां तथैव लङ्कायामपि वैभवसीमा उच्चतमकोटीम् अधिरोहति स्मेति परिलक्ष्यते । तथापि अयोध्यायाम्र राजशासनं लोकतन्त्रानुगतं जनहितकरं न्यायधर्मप्रतिष्ठामूलकम् आर्यधर्मानुगतमेवेति अनुभूयते । लङ्कायां तु आर्यधर्मद्वेषिण: राज्ञ: रावणस्य अपरिमेयवैभवाधिकारिणोऽपि सुनीति विमुखतया दुष्कृतौ प्रवृत्ति: प्रदर्शितेति स्पष्टं प्रतीयते । राजनीतिमार्गे साङ्गोपाङ्गराजनीतिविषयकोपादानसाहित्यम् अयोध्यायां लङ्कायां च उभयत्र समानमेव दृश्यते । परन्तु नीतिमार्गे उपन्यस्त: विषमभेद:। राज्यशासनप्रसङ्गेन राजधर्मसङ्गतानि उपादानानि समानतन्त्रन्यायेन जानकी- हरणाख्ये महाकाव्ये जानकीजवनाख्ये महाकाव्ये च उपस्थापितानि । तथापि जानकीजीवनमहाकाव्यस्य निर्मातु: कविवर्यस्य खिष्टीयविंशशतके लब्धजन्मन: रामराज्यपरिकल्पनायां रामराज्यशासननीतौ आर्यधर्मप्रतिष्ठायाम् अधिकतम: समुत्सुक: परिलक्ष्यते। महाकाव्यद्वयस्य नामनिर्देशक: कविकुमारदासस्य जानकीहरणविषये कवे: अभिराजराजेन्द्रमिश्रस्य च जानकीजीवनविषये पक्षपात: सुस्पष्टं प्रतीयते । अत: महाकाव्यद्वयस्य न

केवलं मुख्यप्रतिपाद्यविषयगतदृष्टिभेद: अपि तु राज्यशासनस्य उद्देश्यगतदृष्टिभेदोऽपि परिलक्ष्यणीय । राज्यशासननीतौ कविकुमारदासस्य नीतिशास्त्रानु- सारत: राजधर्मपालने एव आदर्शप्रतिष्ठा उपलभ्यते । परन्तु कविवरराजेन्द्रमिश्रस्य राजनीतौ आर्यधर्मानुकुलराजधर्मप्रतिष्ठैव आदर्शरूपेण प्रतिभाति। एतद्विषये विद्वत्तल्लजानां कविवर्याणां तत्रभवताम् अभिराजराजेन्द्रमिश्राणां स्वाभिमतानुगादर्श: जानकीजीवन- महाकाव्यस्य पञ्चदशसर्गस्य सप्तमश्लोके महता कण्ठेन समुद्घोषित । तदनन्तरमपि रामराज्यप्रतिष्ठादर्शोऽयम् एकविंशतितमसर्गे रघुकुलगुरुश्रेष्ठ: महातापस: सर्वज्ञकल्प: महर्षिवशिष्ठमुखादपि वैशद्येन समुपस्थापित: ।'

जानकीहरणजानकीजीवनमहाकाव्ययो: राजनैतिकावस्थापर्यालोचनाप्रसङ्गात् उभयोरुद्भवसूत्रस्थनीयं वाल्मीकीय रामायणं यथास्माकं स्मृतिपथमवतरति तथैव महाकविकुमारदासात् प्राग्भूतं कालीदासीयं रघुवंशं भट्टिविरचितं रावणवधाख्यं महाकाव्यं च । मनोभूमौ उद्दीपकदीपालोकरूपेण समुपतिष्ठते । ऊनविंशसर्गात्मके रघुवंशे रघुवंशीयानां नृपतीनां दिलीपमारभ्य अग्निवर्णं यावत् राजत्वकालपरम्परा चित्रिता दृश्यते। रघुवंशमहाकाव्यस्य प्रथमसर्गे सप्तदशसङ्ख्यकश्लोकमारभ्य त्रिंशत्सङ्ख्यकश्लोकपर्यन्तं नृपतिदिलीपप्रसङ्गेन रघुवंशीयानां राज्ञां राजधर्मविद्भि: मनुप्रभृतिभि: मान्यम् आदर्शराजनैतिकाचरणं समुल्लिखितमुपलभ्यते । दशरथराज्यशासने श्रीरामचन्द्रस्य राज्यशासने अपि अयमेव राजधर्मव्यवहार: अनुसृत: । मनुप्रभृतीनां राजधर्ममार्गमुल्यङ्ङ्घ्य उत्पथेन दशरथो वा श्रीरामचन्द्रो वा न कदाचित् प्रवर्तते स्म । भट्टिकाव्येऽपि राजधर्माचरणे अयमेव सुनीतिमार्ग: अवलम्बित: । एतादृशी राजधर्माचरण- व्यवस्था कविकुमारदासीयजानकीहरणमहाकाव्ये तथा कविवर्यस्य अभिराजराजेन्द्रमिश्रस्य महाकाव्येऽपि द्रष्टुं पार्यते । प्रसङ्गोऽयं शोधकार्यस्य विस्तरभिया नेह प्रतन्यते । अनल्पजल्पनात् विरतापि रामायणकथाश्रिताय : विचित्ररूपाखिलकाव्यसृष्टे: प्रभवस्थानरूप-वाल्मीकीयरामायणसम्पृक्तं राजधर्माचरणं समासत: प्रदर्शयितुं इच्छामि ।

सप्तकाण्डात्मकं रामायणं महर्षिवाल्मीकिविरचितम् । सर्वेषामेव महाकवीनां हृदयतन्त्रमालोडयति। शाश्वतकालीनावेदनममूलकमिदं महाकाव्यं देशकालसीमामतिक्रम्य सर्वमानवानां मनोभूमौ सुदृढरूपेण स्वाधिष्ठानं स्थापयितुं सक्षमम् इत्यत्र न कश्चित् शङ्कावसर:। अत: रामायणस्य आदिकाण्डमारभ्य युद्धकाण्डं यावत् राजधर्मस्य वर्णनं मनु-याज्ञवल्क्यप्रमुखानां राजधर्मनीतिम् अनुसृत्यैव प्रवर्तनं दृश्यते । उत्तरकालीनानां शुक्राचार्य-कामन्दक- कौटिल्यादीनां राजनीतिशास्त्राण्यपि तत्र समानुगतानि समुपलभ्यन्ते । अत: मनु-याज्ञवल्क्यादिनिबद्धेषु स्मृतिशास्त्रेषु राजधर्मप्रकरणे तथा शुक्राचार्य-कामन्दक- कौटिल्यादि प्रणीतेषु राजनीतिशास्त्रेषु सर्वत्र राजनैतिकव्यवस्थाया: वर्णितं यच्चित्रमुपलभ्यते तदेव वाल्मीकीये रामायणे काण्डपट्के सुस्पष्टं सुविशदं च आख्यानप्रवाहगतिमुखेन प्रासङ्गिकतया समुल्लिखितं प्राप्यते । बहुमुखविचित्रराजनैतिक- विषयाणां रामायणवर्णितानां पर्यालोचनं विहाय अतिसंक्षेपेण यत् किञ्चिदेव उपात्तविशालराजनैतिकोपादानभाण्डारात् समाहृत्य विशिष्टोदाहरणरूपेण उपस्थापयाम: वयम्। आदौ राजोत्पत्ते: कारणं प्रयोजनञ्चेति वर्णनीयम् । तत एव राजधर्मचर्चा विधेया । आदर्शराजधर्मविधय: अयोध्यानृपते: दशरथस्य तथा राज्याभिषिक्तस्य श्रीरामचन्द्रस्य प्रसङ्गेन रामायणस्य आदिकाण्डे / बालकाण्डे तथा अयोध्याकाण्डे प्रस्तावनारूपेण समुद्दिष्टा उपलभ्यते । अयोध्याकाण्डस्य 67 - तमे सर्गे 38 - संख्यकेषु श्लोकेषु अराजकदोषवर्णनात् राजोत्पत्तिविषय: समुपस्थापित: । अयमेव विषय: मनुसंहितायां सप्तमाध्याये तृतीयश्लोके स्पष्टत: समुल्लिखितो वर्तते । रामायणस्य आदिकाण्डान्तर्गते पञ्चमसर्गे अयोध्यावर्णने षष्ठसर्गे राज्ञ: दशरथस्य राज्यपरिपालनवर्णने सप्तमसर्गे अमात्यवर्णने अष्टमसर्गे अश्वमेधयज्ञवर्णने च कोशलराज्यस्य दशरथाधिष्ठितस्य समृद्धतमं राजनैतिकावस्थावर्णनं समुपलभ्यते । अयोध्यावर्णने उच्चतमराजनैतिकावस्थाकोटित: सम्पद्समृद्धिपरिचयात् आधुनिकनगरसभ्यतापि ततो न्यूनतापन्नेति प्रतीयात् । एवमेव राज्यपरिपालनव्यवस्था धीसचिववर्गसहायेन कर्मसचिववर्गसहायेन च यादृशी प्रचलिता आसीत् इत्युपलभ्यते सा तु आधुनिकानामपि राजनैतिकचेतनासम्पन्नानां जनानां विस्मयमावहेत् । राजनैतिकावस्थाविषयकवर्णनमिदं पूर्वोक्तपञ्चम- षष्ठ- सप्तमाष्टमसर्गेभ्य: विशेषेण ज्ञातव्य: । अयोध्याकाण्डे अरण्यकाण्डे किष्किन्धकाण्डे सुन्दरकाण्डे युद्धकाण्डे च मनु- याज्ञवल्क्यादिवर्णितराजधर्मप्रकरणस्य विषयाणां विस्पष्टोदाहरणानि कथामुखेन तथा मुख्यवृत्तान्तप्रवाहान्तर्गतघटमानविषयतया यथोपयुक्तं यथायुक्तञ्चेति समुपलभ्यते । काण्डषट्कमनुसृत्य उदाहरणमुखेन राजधर्मोपदेशमूलकविषयनिर्देशेन च आलोचनं राजनैतिकव्यवस्थाया: एकं सुरम्यं सुरुचिरं सुनीतिमयं चित्रं स्यादिति मन्यमाना अपि वयं तथा वर्णनात् विरमामह: ।

एतावत्पर्यन्तं कृत्स्नमालोचनं जानकीहरणजानकीजीवनमहाकाव्यद्वयान्तर्गत- राजनैतिकावस्थाया: वर्णनमाश्रित्य स्वातन्त्र्येण व्यष्टिरूपेण तुलनात्मकविचारेण च कृतम् अस्माभि:। पर्यालोचनस्यैतस्य स्पष्टीकरणार्थं याथातथ्येन च समुपस्थापनार्थं प्राचीनराजनीतिशास्त्राणि आलोचितानि ईक्षितानि च वाल्मीकीयरामायणकालदासीयरघुवंश भट्टिविरचितरावणवधाख्यानि महाकाव्यानि भासविरचितनाटकद्वयं भवभूतिविरचितं नाटकुयगलञ्चेति राजनीतिविषयकज्ञानसमृद्धानि । साकल्येन समुदितानां पर्यवेक्षणेन समुद्भासितानां तथ्यानां विवरणेन आलोच्यमहाकाव्यद्वये उपात्तराजनैतिकावस्था ऋजुपथसेविता सुगम्या च प्रतिभाति । अस्मिन् लेखे जानकीहरणजानकीजीवनमहाकव्ययो: उपवर्णिता: राजनीतिविज्ञानविषया: निरुपिता: । तत्र राजधर्म: करनीति:, राष्ट्रशासनम् इत्यादिविषयाणां तुलनात्मकरूपेण विचार: कृत: अस्ति ।

**सन्दर्भसूची**

1. आचार्य:, पंचाननतर्करत्न: (सम्पादक :), विष्णुपुराणम्, कोलकातायाम् : नवभारतप्रकाशनम्, 1960 बंगाबद: ।

2. उंकारनाथ:, सीतारामदास: श्रीमद्वाल्मिकीयरामायणम् (बंगानुवादसहितम्), कोलकातायाम् : आर्य्यशास्त्र - प्रकाशनम्, 19651

3. गंगानाथ:, मनुसंहिता, देहल्याम् : परिमलपब्लिकेशन, 1992 ।

4. मिश्र:, अभिराजराजेन्द्र:, जानकीजीवनम्, इलाहावादनगर्याम् : बैजयन्त- प्रकाशनम्, 1988।

6. मिश्र:, यदुनन्दन: (सम्पादक :), महाकविकुमारदासविरचितजानकीहरणम् (एकसांस्कृतिक एवं समालोचनात्मक अध्ययन्), राणस्याम् : चौखम्बा ओरियान्टालिया, 1997।

7. शुक्ल:,वेदव्यास: (सम्पादक:), महाकविकुमारदासकृतजानकीहरणम् (प्रथम- द्वितीयसर्गात्मकम्), वाराणस्याम् : चौखम्बा सूरभारती प्रकाशनम्, 1999।

8. सातवेलकर:, श्रीपाददामोदर: (सम्पादक :), ऋग्वेद संहिता ( सायणाचार्यकृत- भाष्यसमेतम्), पारडयाम् : वसन्त श्रीपाद - सातवलेकरप्रकाशनम्, 19311

9. सिंह:, सत्यव्रत: (सम्पादक :), विश्वनाथाचार्यकृतसाहित्यदर्पण:, वाराणस्याम्: चौखम्बा विद्याभवनम् ।

10. त्रिपाठी, राधावल्लभ:, संस्कृतकथाशास्त्र और काव्यपरम्परा, देहल्याम्: प्रतिभा प्रकाशनम्, द्विर.सं. 2004 1

11. त्रिपाठी, राधावल्लभ:, संस्कृत साहित्य का अभिनव इतिहास, वाराणस्याम्:
विश्वविद्यालयप्रकाशनम्, तृ.सं. 20101

13. Achāryā, M. Krsnam. History of Classical Sanskrit Literature. Delhi : M.L.B.D. 1970

14. Altekar, A.S. State and Government ofAncient India, Delhi: M.L.B.D. 2001.

15. Altekar, A.S. Position of Women in Hindu Civilization, Delhi: M.L.B.D. 1958.

16. Bandopadhyāyaḥ, Nārāyaṇa. Chandra. Development of Hindu polity and Political Theories. Kolkata: R. Combray & Co. 1927.

17. Banerjee, Pramathanatha. Public Administration in Ancient India. London: Macmillan & Co. 1920.

18. Johari, J.E. Principals of Modern political science. New Delhi: Sterling.2002.

19. Kanjilāl, Dilip. Kumār. ed. Chandomanjarī of Gangādāsa. Kolkātā : Modern BookAgency. 2nd edition, 1970.

1. साहित्यदर्पण: 6/313

2. ऋग्वेदसंहिता, 10/173,174, पृ. 760-761

3. अथर्ववेदसंहिता, 1/6/1-2; 3/1/1-5

4. अथर्ववेदसंहिता, 4/7/1; 6/11/1; 6/13/1

5. ऐतरेयब्राह्मणम् 38/3 पृ. 933–934
6. जानकीहरणम्, 1/12–13
7. तत्रैव, 1/10–11
8. तत्रैव, 1/14
9. तत्रैव, 1/16–251
10. तत्रैव, 1/45–721
11. तत्रैव, 1/16–251
12. जानकीहरणम्, 1/901
13. तत्रैव, 10, 4/67–691
14. नीतिशास्त्रम्।
15. जानकीहरणम्, 6/391
16. तत्रैव 6, 15, 17,18, 19, 20/53–551
17. मनुसंहिता, 7/1–3, 13–151
18. जानकीजीवनम् 4/41
19. तत्रैव, 10/10–111
20. तत्रैव, 10, 15, 21, 18, 20/1–5, 21/154–160,163,1661
21. जानकीजीवनम् प्रथमसर्गः ।
22. जानकीजीवनम् 21/7–40, अयोध्यावर्णनम्। 21 / 149, कोशलजनपदवर्णम् ।
23. जानकीजीवनम् 21, 13, 18, 21/241
24. मनुसंहिता, 127–171।
25. जानकीजीवनम् 21/241
26. जानकीजीवनम्, 18/44–48, 21/158–1681